

# ॥ श्रीभगवत् स्तुतिः – मार्कण्डेय – स्कन्द पुराणम् ॥

## Sri Bhagavat Stuti – Sage Markandeya – Skanda Puranam

The following is a rare hymn on **Lord Vishnu** from **Skanda Puranam, Vaishnava Khandam, Utkhala Khandam and Chapter 3** by **Sage Markandeya**. Pleased by this hymn, **Sri Bhagavan** bestowned him the vision of Himself seated on a banyan leaf as a child.

श्रीमार्कण्डेय उवाच –

त्वत्-पाद-पद्माऽनुसरानुषङ्गं रुद्रेन्द्र पद्मासन सम्पदाढ्यम् ।
त्वद्-भक्ति-हीनं परितः प्रतप्तं दीनं परित्राहि कृपाम्बुधे माम् ॥ १ ॥

ब्रह्मादिभिर् यत्-परिचर्यमाणं पदाम्बुज द्वन्द्वं अचिन्त्य शक्तिः ।
श्वः श्रेयसग्राग्रि निदान तत्त्वं दीनं परित्राहि कृपाम्बुधे माम् ॥ २ ॥

यदङ्ग-भूतं जगदण्डं एतद् अनेक-कोटि प्रगणं विभाति ।
लीला विलास स्थिति सृष्टि लीनं तन् मां सुदीनं परिरक्ष विष्णो ॥ ३ ॥

एकं सुवर्णं कटकादि भेदैर् नाना यथा वा नभसोदितो ऽर्कः ।
आधार वैषम्य जलेषु तादृग् विभाव्यसे निगुण एक एव ॥ ४ ॥

अशेष सम्पूर्ण रुचि प्रहीणो पादानसङ्कल्प-विवर्जितो ऽपि ।
दीनानुकम्पा ऽनुगुणं बिभर्षि युगे युगे देहमपार-शक्ते ॥ ५ ॥

त्वद्-पाद-पद्मं जगीश पूर्वं असेव्यतानात्मधिया मया यत् ।
तत् कर्मणा दारुण पाक भाजं दीनं परित्राहि कृपाम्बुधे माम् ॥ ६ ॥

अशेष लोक स्थिति सृष्टि लीन विलासि यत्ते त्रिगुणं विभाति ।
वपुर् महात्मन् महदादि हेतुर् हेतोर् नमस्ते प्रकृतेः परस्य ॥ ७ ॥

सर्वत्र गत्वा बृहद् अप्रमेयं प्रवर्द्धमानं त्वयि बृहितं च ।
तद् ब्रह्म-रूपं परिणाम-हेतुं स्वाध्यात्म विश्वात्मकं आश्रयामि ॥ ८ ॥

एकार्णवे महाघोरे नावस्थातुं प्रदेशभूः ।
अस्ति लक्ष्मीपते मेघ-वारि वात प्रकम्पनात् ॥ ९ ॥

त्राहि विष्णो जगन्नाथ मग्नं संसार-सागरे ।
मां-उद्धरास्माद् गोविन्द कृपा-पाङ्ग-विलोकनात् ॥ १० ॥

---

॥ इति श्रीस्कान्दे-महापुराणे वैष्णव-खण्डे पुरुषोत्तम-क्षेत्र-माहात्म्ये
श्रीमार्कण्डेय कृत श्रीभगवत् स्तुतिः सम्पूर्णम् ॥